# मातः
## (कवि यशवंत यांच्या ‘आई’ या कवितेचा भावानुवाद)

---

आवाहनं कदाचित् कश्चित् करोति मातर् !
श्रुत्वैव तन्मनो मे सद्यः शुचा विदीर्णम्
आवाहनं नु मन्ये क्षिप्तं नु हिंस्रमस्त्रम्
मातेति काऽभिवंद्या न द्वारि सा न गेहे
सौख्यस्य हीनतेयं चित्तं दुनोति नित्यम्
मात्रा विना वराको विश्वेश्वरोऽपि रंकः ॥१ ॥
रुच्यं तृणं शिशुभ्यः प्रेम्णाऽर्प्यते चटक्या
गोष्ठस्थितान् स्वकीयान् गावो लिहन्ति वत्सान्
वात्सल्यमर्भकेषु प्रेक्ष्येऽन्वहं पशूनाम्
आलोच्य सर्वमेतत् हा खिद्यतेऽन्तरात्मा
कुत्रापि नास्ति मातुर् वात्सल्यमस्मदर्थे
दैन्यं त्वतःपरं किं नो विद्यते न माता ॥२ ॥
क्रोडीकरोति वत्सं विद्यालयात् निवृत्तम्
ग्रासं ददाति माता गोपायितं सुतास्ये
तत् चुंबितुं मुखं द्राक् सा चेहते सरागम्
काऽन्या त्वया विनैतत् प्रीत्या यतेत कर्तुम्
सायं प्रदीपयेत् का वर्तिं विना त्वया माम्
नः शास्ति काऽपरा वा प्रेम्णा शुभं करोति ॥३॥
मुग्धा स्वसा मदीया जानाति सा न किंचित्
मातुर्वियोगदुखेः सा सर्वथाऽनभिज्ञा
दृष्ट्वाऽश्रुपूर्णनेत्रे मे मोहमेति बाला
किन्तु श्रुणोति बाढं ‘नास्त्यावयोर्हि माता’
ब्रूते क्वचित् सखिभ्यो नास्त्यावयोर्हि माता
श्रुत्वा वचस्तदीयं हा दूयतेऽति चित्तम् ॥४॥
त्वय्येव सौरभेय्या मातः स्थितं नु वर्चः
त्वं धाम मंगलानां त्वं शं तपोधनानाम्
भूमेरुदारता सा गंभीरता च सिंधोः
अक्ष्णोर्द्युतिश्च शान्ता ते भाति चंद्रिकायाः

कादंबिनीस्थितं ते वात्सल्यमस्ति चित्ते ॥५॥
गानं मया गुणानां नूनं कृतं गुरूणाम्
अत्यादृतं समस्तैः सभ्यैस्तु तद् यथेष्टम्
आशंसितुं तु मातर् मां०० ०वसण८ हन्त तत्र नासीः
न्यूनं विलोक्य नो मे मान्याऽन्यमानमाला
अन्यैः कृता प्रशंसा मे तोषणाय नालम्
आशिर्वचो नु मातुः श्रोतुं शिशुर्बुभुत्सुः ॥६॥
प्रत्यागमिष्यसि त्वं गेहं कदा स्वकीयम्
कालात्ययो न शस्तः प्रत्येहि मां सवेगम्
त्वत्स्नेहरज्जुबद्धं त्वत्पादयोर्मनो मे
आयाहि कार्यजातं संपादय त्वदीयम्
रोषामि नाधुनाऽहं कोपं कुरुष्व कामम्
क्रोद्धुं हि भूरि मह्यं एह्येहि शीघ्रशीघ्रम् ॥७॥

*****

वैद्य श्रीनिवास पु. हिर्लेकर

(By: Vaidya Shriniwas P. Hirlekar)